# Vedavyasaproktam Ganapati Stotram

# વેદવ્યાસપ્રોક્તં ગણપતિસ્તોત્રમ્

## Document Information

Text title : Vedavyasaproktam Ganapati Stotram

File name : vedavyAsaproktaMgaNapatistotram.itx

Category : ganesha, padmapurANa, stotra, aShTaka

Location : doc_ganesha

Proofread by : PSA Easwaran

Description/comments : padmapurANa | sRRiShTikhaNDa | adhyAya 64/1-11||

Latest update : April 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2025

*sanskritdocuments.org*

# Vedavyasaproktam Ganapati Stotram

# વેદવ્યાસપ્રોક્તં ગણપતિસ્તોત્રમ્

વ્યાસ ઉવાચ ।
પુનરન્યત્પ્રવક્ષ્યામિ સ્તોત્રં ગણાધિપસ્ય ચ ।
સર્વસિદ્ધિકરં પૂતં સર્વાભીષ્ટફલપ્રદમ્ ॥ ૧॥

એકદન્તં મહાકાયં તપ્તકાઞ્ચનસન્નિભમ્ ।
લમ્બોદરં વિશાલાક્ષં વન્દેઽહં ગણનાયકમ્ ॥ ૨॥

મુઞ્જકૃષ્ણાજિનધરં નાગયજ્ઞોપવીતકમ્ ।
બાલેન્દુકલિકામૌલિં વન્દેઽહં ગણનાયકમ્ ॥ ૩॥

સર્વવિઘ્નહરં દેવં સર્વવિઘ્નવિવર્જિતં
મૂષકોત્તમમારુહ્ય દેવાસુરમહાહવે ।
યોદ્ધુકામં મહાબાહું વન્દેઽહં ગણનાયકમ્ ॥ ૪॥

અમ્બિકાહૃદયાનન્દં માતૃકાપરિવેષ્ટિતમ્ ।
ભક્તપ્રિયં મદોન્મત્તં વન્દેઽહં ગણનાયકમ્ ॥ ૫॥

ચિત્રરત્નવિચિત્રાઙ્ગં ચિત્રમાલાવિભૂષણમ્ ।
કામરૂપધરં દેવં વન્દેઽહં ગણનાયકમ્ ॥ ૬॥

ગજવક્ત્રં સુરશ્રેષ્ઠં ચારુકર્ણવિભૂષિતમ્ ।
પાશાઙ્કુશધરં દેવં વન્દેઽહં ગણનાયકમ્ ॥ ૭॥

યક્ષકિન્નરગન્ધર્વૈઃ સિદ્ધવિદ્યાધરૈસ્સદા ।
સ્તૂયમાનં મહાદેહં વન્દેઽહં ગણનાયકમ્ ॥ ૮॥

ગણાષ્ટકમિદં પુણ્યં ભક્તિતો યઃ પઠેન્નરઃ ।
સર્વસિદ્ધિમવાપ્નોતિ રુદ્રલોકે મહીયતે ॥ ૯॥

ન નિઃસ્વતાં તથાભ્યેતિ સપ્તજન્મસુ માનવઃ ।
ય ઇદં પઠતે નિત્યં મહારાજો ભવેન્નરઃ ॥ ૧૦॥

વશ્યં કરોતિ ત્રૈલોક્યં પઠનાચ્છ્રવણાદપિ ।
સ્તોત્રં પરં મહાપુણ્યં ગણપસ્ય મહાત્મનઃ ॥ ૧૧॥

ઇતિ શ્રીપાદ્મપુરાણે સૃષ્ટિખણ્ડે ચતુષ્ષષ્ટિતમાધ્યાયાન્તર્ગતં
વેદવ્યાસકૃતં ગણપતિસ્તોત્રં સમાપ્તમ્ ।

પદ્મપુરાણ । સૃષ્ટિખણ્ડ । અધ્યાય ૬૪/૧-૧૧॥

padmapurANa . sRRiShTikhaNDa . adhyAya 64/1-11..

Proofread by PSA Easwaran

---

*Vedavyasaproktam Ganapati Stotram*
pdf was typeset on April 5, 2025

Please send corrections to *sanskrit@cheerful.com*